# गुरु पादुका पञ्चकम्

जगज्जनिस्थेम - लयालयाभ्यां
अगण्य पुण्योदय भाविताभ्याम् ।
त्रयीशिरोजात निवेदिताभ्यां
नमो नमः श्री गुरुपादुकाभ्याम् ॥१॥

विपत्तमस्तोम विकर्तनाभ्यां
विशिष्ट संपत्ति विवर्धनाभ्याम् ।
नमज्जनाशेष विशेषदाभ्यां
नमो नमः श्री गुरुपादुकाभ्याम् ॥२॥

समस्तदुस्तर्क कलङ्क पङ्का -
पनोदन प्रौढ जलाशयाभ्याम् ।
निराश्रयाभ्यां निखिलाश्रयाभ्यां
नमो नमः श्री गुरुपादुकाभ्याम् ॥३॥

तापत्रयादित्य करार्दितानां
छायामयीभ्यां अतिशीतलाभ्याम् ।
आपन्नसंरक्षण दीक्षिताभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥४॥

यतो गिरोऽप्राप्य धिया समस्ता
ह्रिया निवृत्ताः सममेव नित्याः
ताभ्यामजे शाच्युत भाविताभ्याम् ।
नमो नमः श्रीगुरुपादुकाभ्याम् ॥५॥

ये पादुकापण्चक मादरेण
पठन्ति नित्यं प्रयताः प्रभाते
तेषां गृहे नित्यनिवासशीला
श्रीदेशिकेन्द्रस्य कटाक्षलक्ष्मीः ॥